# संस्कृत-वार्ता:

**दिनाङ्क :- 27.05.2024** **सायम् - 06:20**

**मुख्यवार्ता:**

- भीषणातिभीषणचक्रवात: रेमल इति सामान्य-चक्रवाते परिवर्तित:। पश्चिमबंगालराज्ये अतिवृष्ट्या स्थिति प्रतिकूला वर्तते।
- गुजरात प्रशासनेन राजकोट-स्थले टीआरपी-गेम-जोन इत्यत्र अग्निकाण्डे द्वौ आरक्षिबलाधिकारिणौ समेत्य सप्ताधिकारिण: निलम्बिता:, अस्यां दुर्घटनायां न्यूनातिन्यूनं त्रिंशत्-जना: मृत्युमुपगता: इति आशंका वर्तते।
- लोकसभानिर्वाचनस्य सप्तमान्तिमचरणाय च प्रचारभियानं तीव्रतया प्रचलति।
- दिल्ल्या: मुख्यमन्त्रिणा अरविन्दकेजरीवालेन स्वास्थ्यनिरीक्षणाय स्वीय-अल्पावधिक-मुक्ति-याचिकां सप्तदिनानि यावत् संवर्धयितुं सर्वोच्चन्यायालये याचिका प्रस्तुता।
- हॉकी-क्रीडायां बेल्जियम्-देशस्य आन्ट्वर्प्-नगरे एफ्. आई. एच्. हाकी-प्रो-लीग् इत्यस्य यूरोपीय-चरणस्य चतुर्थक्रीडायां भारतम्अर्जेण्टीना-देशं पञ्च-चतुर्भि: अङ्कैः पराजयत।

**भारतर्तुविज्ञानविभाग:**

भीषणचक्रवात: रेमल इति शनै: शनै: पूर्वोत्तरीय-भारतं प्रति वर्धते। अयं चक्रवात: सामान्य चक्रवाते परिवर्तित: अपि च बांग्लादेशस्य मंगला इत्यत्र अद्य प्रात: केन्द्रितो वर्तते। कस्याचित् होराया: पूर्वं अस्य केन्द्रं कोलकातानगरात् नवति किलोमीटरमिते दूरे स्थितमासीत्। सम्प्रति पूर्वदिशां अस्यं च प्रति अग्रे सरति। भारतर्तु-विज्ञानविभागस्य महानिदेशक: डॉ. मृत्युमजय-महापात्र: अद्य मध्याह्ने नवदिल्ल्यां वार्ताहरान् संसूचयत् यत् पश्चिमबंगालराज्ये प्रतिकूल-ऋतु: सामान्यो भविष्यति। असौ निगदितवान् यत् अद्य केवलम् अस्य राज्यस्य पूर्वी-जनपदेषु अतिवृष्टि: सम्भाव्यते। तीव्रवायुप्रवाहात् जलतरंगाच्च उत्तरी-ओडिसाया: तटे सागरस्थिति: प्रतिकूला जाता। विभागेन राज्यस्य बालासोर-भद्रक-केन्द्रपाडा-जगतसिंहपुर जनपदानां केषुचित् भागेषु मध्यवृष्ट्या साकं तीव्रवायो: चक्रवातस्य च सम्भावना प्रकटिता।

**गुजरात-प्रकरणम्**

गुजरात प्रशासनेन राजकोट-स्थले टीआरपी-गेम-जोन इत्यत्र अग्निकाण्डे द्वौ आरक्षिबलाधिकारिणौ समेत्य सप्ताधिकारिण: निलम्बिता: । अस्माकं वार्ताहरेण संसूचितं यत् शनिवासरे सञ्जातायां अस्यां दुर्घटनायां न्यूनातिन्यूनं त्रिंशत्-जना मृत्युमुपगता: इति आशंका वर्तते। घटनाया: निरीक्षणाय अतिरिक्तारक्षि-महानिदेशकस्य सुभाष-त्रिवेदिन: अध्यक्षतायां पञ्चसदस्यानां एकस्य विशिष्ट-दलस्य एसआईटी इत्येतस्य निर्माणं कृतम्।

**लोकसभा-निर्वाचन**

लोकसभानिर्वाचनस्य सप्तमान्तिमचरणाय च प्रचारभियानं तीव्रतया प्रचलति। राजनीतिकदलानां शीर्षनेतार: जनसभा: मार्गप्रदर्शनं च कुर्वन्ति। अस्मिन् चरणे जूनमासस्य प्रथमे दिनांके अष्टराज्यानां सप्तपञ्चाशदासनेभ्य: मतदानं भविष्यति। मतगणना जूनमासे चतुर्थे दिवसे भविष्यति। बिहारराज्ये पटनासाहिब-संसदीय क्षेत्रस्य खुसरूपुर-क्षेत्रे कांग्रेसनेता राहुलगांधी प्रोक्तवान् यत् एनडीए इति प्रशासनं द्विकोटि-युवभ्य: वृत्यवसरस्य प्रदानस्य वचनं न पूरितम्। असौ कथितवान् यत् प्रधानमन्त्री एतदर्थं उत्तरं निज-प्रतिवेदनपत्रे प्रददातु। श्रीगांधी पाटलिपुत्र-आरा-संसदीय क्षेत्रान्तर्गतं पालीगंज-आरा-जनपदयो नैर्वाचनिक-जनसभाया: कृते सज्जो वर्तते। लोकसभा-निर्वाचनस्य सप्तमे चरणे जूनमासस्य प्रथमे दिनांके एतेषु क्षेत्रेषु निर्वाचनं भविष्यति। राजदनेता तेजस्वी-प्रसाद-यादव: जहानाबाद-लोकसभाक्षेत्रस्य घोसी-क्षेत्रे आक्षिप्तवान् यत् भारतीय-जनता-पार्टीति दलं संविधानस्यावसानं वाञ्छति। भाजपेतिदलस्य वरिष्ठनेता मध्यप्रदेशस्य मुख्यमन्त्री डॉ. मोहनयादव: पाटलिपुत्र संसदीय-क्षेत्रात् भाजपा-प्रत्याशिन: समर्थने घटनाया: मनेर-स्थले जनसभा: कुरूते। ओडिसाराज्ये बीजेडी प्रमुख: मुख्यमन्त्री नवीनपटनायक: केन्द्रपारा-लोकसभा-क्षेत्रस्य बरूआ क्षेत्रे जनसमागमं सम्बोधितवान्।

**ओडिसा-विधानसभा**

ओडिसा राज्ये विधानसभाया: द्विचत्वारिंशदासनेभ्य: भविष्यमाणाय मतदानाय प्रचाराभियानं चरमावस्थायां वर्तते। ओडिसाराज्यस्य मुख्यमन्त्री बीजूजनतादलस्य प्रमुख: च नवीन-पटनायक: केन्द्रपाड़ा-संसदीय-क्षेत्रस्य अन्तर्गतं बरुआ इत्यत्र एकां जनसभां सम्बोधितवान्। प्रधानमन्त्री

भाजपादलस्य वरिष्ठनेता च नरेन्द्रमोदी लोकसभा-विधानसभा-निर्वाचनाभ्यां दलस्य प्रत्याशिभ्य: प्रचाराय अस्मिन् सप्ताहे ओडिसाया: यात्रां करिष्यति। श्री अमितशाह: श्व: ओडिसायां चांदबाली-कोरेई-निमापारा इत्येतेषु स्थलेषु जनसभा: सम्बोधयिष्यति। कांग्रेस-दलाध्यक्ष: मल्लिकार्जुन-खरगे अपि अस्य मासस्य नवविंशति दिनांके ओडिसायां नैर्वाचनिकप्रचारं करिष्यति। कांग्रेस-दलस्य वरिष्ठनेता राहुलगांधी अस्य मासस्य त्रिंशत्-दिनांके सिमुलिया इत्यत्र जनान् सम्बोधयिष्यति।

**निर्वाचनायोग: - जम्मू-कश्मीर**

अस्य वर्षस्य लोकसभा-निर्वाचने जम्मू-कश्मीरराज्ये अष्टपञ्चाशत्-चत्वारि-षड् प्रतिशतं मतदानेन सहैव पञ्चत्रिंशत्वर्षेषु सर्वाधिकं मतदानं सञ्जातम् इति समंकितम्। केन्द्रशासितप्रदेशे अस्मिन् पञ्च संसदीय-क्षेत्राणि समाविष्टानि सन्ति। येषु बारामूला-श्रीनगर-अनन्तनाग-राजौरी-उधमपुर-जम्मू इत्यादिनि सन्ति। कश्मीरोपत्यकायां त्रिषु नैर्वाचनिक-क्षेत्रेषु श्रीनगरे अष्टत्रिंशत्-चत्वारिनवप्रतिशतं, बारामूलायां नवपञ्चाशत्-एकं प्रतिशतं अनन्तनाग-राजौर-क्षेत्रयो: चतु:पञ्चाशत्-षट्चत्वारिप्रतिशतं मतदानं समनुष्ठितम्। अन्ययो: द्वयो: उधमपुर-जम्मू-क्षेत्रयो: क्रमश: अष्टषष्टि: दशमलव द्वे सप्त प्रतिशतं द्विसप्तति दशमलव द्वे द्वे प्रतिशतं मतदानं जातम्। मुख्य-निर्वाचना-युक्तेन राजीवकुमारेण उपलब्धि पुरस्सरं शुभकामना: प्रख्यापिता:।

**दिल्ली-मुख्यमन्त्री**

दिल्ल्या: मुख्यमन्त्रिणा आम-आदमी-पार्टीति दलस्य राष्ट्रिय-संयोजकेण अरविन्दकेजरीवालेन स्वास्थ्यनिरीक्षणाय स्वीय-अल्पावधिक-मुक्ति-याचिकां सप्तदिनानि यावत् संवर्धयितुं सर्वोच्चन्यायालये याचिका प्रस्तुता। अत्रावधौ प्रर्वतन-निदेशालयेन गतसप्ताहे दिल्ल्या: एकस्मिन् न्यायालये श्रीकेजरीवालस्य अल्पावधिक-याचिकाया-समाप्तेरनन्तरं न्यायिक-निगडनं चतुर्दश-दिनानि यावत् संवर्धयितुं याचिका प्रख्यापिता।

**प्रधानमन्त्री-साक्षात्कार:**

प्रधानमन्त्री भाजपेतिदलस्य च वरिष्ठ: नेता नरेन्द्रमोदी प्रावोचत् यत् आत्मनिर्भर-लक्ष्यान्तर्गतं स्वदैशिकप्रतिभा संवर्धनं वृत्यवसर-क्षमतानां संवर्धनमिति उद्देश्यं वर्तते। एकस्मिन् वार्ता-अभिकरणे स्वीय-साक्षात्कारे श्रीमोदी उक्तवान् यत् प्रत्यक्ष-लाभार्थि-हस्तांतरणस्य माध्यमेन जनेभ्य: अष्टत्रिंशत्-लक्ष-रूप्यकाणि आवण्टितानि। प्रधानमन्त्री सबलं प्रत्यपादयत् यत् प्रशासनस्य प्रत्येकस्मिन् निर्णयकेन्द्रे राष्ट्रप्रधानं एव भवति।

**राष्ट्रपति:-ब्रह्माकुमारीज**

राष्ट्रपतिपदासीना द्रौपदामुर्मु: अद्य अवदत् यत् नि:स्वार्थेण कल्याणस्य भावनया ओतप्रोतं सम्भूय कार्यनिष्पादनं आन्तरिक-आध्यात्मिकताया: सामाजिक-अभिव्यक्ति: अस्ति। अनया समुदीरितं यत् प्रजानां कल्याणाय दानं अतिविशिष्टं आध्यात्मिक मूल्यमपि वर्तते। राष्ट्रपति: मुर्मु: ब्रह्माकुमारीज द्वारा नवदिल्ल्या: भारतमण्डपस्थले आयोजिते एकस्मिन् समारोहे शुद्ध-स्वस्थ-समाजयो: कृते आध्यात्मिक-शक्तिकरणस्य राष्ट्रियोद्घाटने एकां जनसभां सम्बोधयन्ती आसीत्। राष्ट्रपति: अग्रे प्रावोचत् यत् स्वस्थमानसिकतैव समग्रकल्याणं भवतीति। अपि च आध्यात्मिक-शक्तिरणमेव यथार्थ-सशक्तिकरणं वर्तते। अपरत्र आध्यात्मिकमूल्यं सर्वेषां धर्माणां जनान. परस्परं संयोजयति।

**व्यायाम विद्या-एशियनचैम्पियनशिप**

व्यायाम विद्यायां,उज्बेकिस्तानस्य ताशकंद-नगरे एशियन्-चैम्पियनशिप-क्रीडायां भारतस्य प्रथमं स्वर्णपदकं प्राप्य दीपा कर्माकरेण रचित: इतिहास:। त्रिंशतवर्षीया ओलिम्पियन् इत्येषा महिलानां वाल्ट् इत्यस्याम्अन्तिमस्पर्धायां त्रयोदश दशमलव पंच षड् अङ्कं पञ्जीकृतवती।

**हॉकी**

हॉकी-क्रीडायां बेल्जियम्-देशस्य आन्ट्वर्प्-नगरे एफ्. आई. एच्. हाकी-प्रो-लीग् इत्यस्य यूरोपीय-चरणस्य चतुर्थक्रीडायांभारतम्अर्जेण्टीना-देशं पञ्च-चतुर्भि: अङ्कै: पराजयत। तदनन्तरं भारतं जून्-मासस्य प्रथमे दिनाङ्के जर्मनी-देशेन सह स्पर्धिष्यति।

**।। इति वार्ता: ।।**